रागं: हंसानन्दि ताळम्: आदि

देवदेवम् भजे दिव्यप्रभावम्
रावणासुरवैरि रघुपुङ्गवं रामम्

1. राजवरशेखरं रविकुलसुधाकरम्
आजानुबाहुं नीलाभ्रकायम्
राजारिकोदण्ड राजदीक्षागुरुम्
राजीवलोचनं रामचन्द्रम्

2. पङ्कजासनविनुत परमनारायणम्
शङ्करार्जितजनकचापदळनम्
लङ्काविशोषणं लालितविभीषणम्
वेङ्कटेशं साधुविबुध विनुतम्